Title अमरकोशः

Author अमरसिंहः

Extent १५२ पत्र Age

Subject कोश

नामलिङ्गानुशासनम् अमरकोशाख्या

५८४

अ॰ को॰ १

ॐ श्रीगणेशायनमः ॐ दिश्याद्वोनिशिवयोस्तिलकायमानं गौ
रीवनाहविललाटविलोचनेनः अन्योन्यगाढपरिरंभनिपीडनेन।
पिंडीभवन्बहिरिविस्फुरितोऽनुरागः ॐ यस्यज्ञानदयासिंधोरगाधस्या
नघागुणाः सेव्यतामक्षयोधीराःसश्रियेचामृतायच समाहृत्यान्य
तंत्राणिसंक्षिप्तैःप्रतिसंस्कृतैः संपूर्णमुच्यतेवर्गैर्नामलिंगानुशास
नं प्रायशोरूपभेदेनसाहचर्याच्चकुत्रचित् स्त्रीपुन्नपुंसकंज्ञेयंतद्वि
शेषविधेःक्वचित् भेदाख्यानायनद्वंद्वोनैकशेषोनसंकरः कृतो
ऽत्रभिन्नलिंगानामनुक्तानांक्रमादृते त्रिलिंग्यांत्रिष्वितिपदंमिथुने १

त्तद्वयोरिति निषिद्धलिंगं शेषार्थं त्वंताथादि न पूर्वभाक् स्वरव्ययं स्व
र्गनाकत्रिदिवत्रिदशालयाः सुरलोको द्योदिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपं
१ अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः सुपर्वाणः सुमनसस्त्रिदि
वेशा दिवौकसः आदितेया दिविषदो लेखा अदितिनंदनाः आदित्या ऋ
भवोस्वप्ना अमर्त्या अमृतांधसः बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवार
यः वृंदारका दैवतानि पुंसि वा देवताः स्त्रियां २ आदित्यविश्ववसवस्तु
षिताभास्वरानिलाः महाराजिकसाध्याश्च रुद्राश्च गणदेवताः ३ वि
द्याधरोप्सरोयक्षरक्षोगंधर्वकिन्नराः पिशाचो गुह्यकः सिद्धो भूतोमी दे

वयोनयः १० असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः शुक्रशिष्या दिति
सुताः पूर्वदेवाः सुरद्विषः १० सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः
समन्तभद्रो भगवान्मारजिल्लोकजिज्जिनः षडभिज्ञो दशबलोऽद्वयवा
दी विनायकः मुनीन्द्रः श्रीघनः शास्ता मुनिः १२ शाक्यमुनिस्तु यः सः
शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः गौतमश्चार्कबन्धुश्च माया
देवीसुतश्च सः २ सिद्धार्थो वीतरागोऽर्हन्केवली तीर्थकृज्जिनः स्याद्वाद
वादी निर्हारो निर्ग्रन्थ ऋषिरित्यपि ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी
पितामहः हिरण्यगर्भो लोकेशः स्वयंभूश्चतुराननः धाताब्जयोनि २

द्रुहिणो विरिंचिः कमलासनः स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृ
ड्विधिः धातानंदः धातृपतिः स्थविरो हंसवाहनः २४ विष्णुर्नाराय
णः कृष्णो वैकुंठो विष्टरश्रवाः दामोदरो हृषीकेशः केशवो माधवः
स्वभूः दैत्यारिः पुंडरीकाक्षो गोविंदो गरुडध्वजः पीताम्बरोऽच्युतः शा
र्ङ्गी विष्वक्सेनो जनार्दनः उपेंद्र इंद्रावरजश्चक्रपाणिश्चतुर्भुजः पद्म
नाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः देवकीनंदनः शौरिः श्रीपतिः पु
रुषोत्तमः वनमाली बलिध्वंसी कंसारातिरधोक्षजः विश्वंभरः कैटभ
जिद्विधुः श्रीवत्सलांछनः पुराणपुरुषो दाशार्होब्धिशायी गदाग्रजः

श्री॰
को॰
२

जलशायीविश्वरूपोमुकुंदोमुरमर्दनः २२ संवकेशोहरिर्देषाकपि॰
स्व वसुदेवोस्यजनकःसएवानकदुंदुभिः बलभद्रःप्रलम्बघ्नोबल
देवोच्युताग्रजः रेवतीरमणोरामःकामपालोहलायुधः नीलाम्बरोरौ
हिणेयस्तालांकोमुसलीहली संकर्षणःसीरपाणिःकालिंदीभेदनो॰
बलः २३ मावतोपि शुचियोनिर्नेत्रसखोहृच्छयोरतिवल्लभः मद
नोमन्मथोमारःप्रद्युम्नोमीनकेतनः कंदर्पोदर्पकोनंगःकामःपंच
शरःस्मरः शंभरारिर्मनसिजःकुसुमेषुरनन्यजः पुष्पधन्वारतिप॰
तिर्मकरध्वजआत्मभूः २४ चैत्रसखःशृंगारयोनिःपुष्पकेतुश्चतिभा २

3

शुरिः ब्रह्मसूर्विश्वकेतुस्यादनिरुद्ध उषापतिः ४ विष्वक्सेनात्मजा॰
त्मजः लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया मा रमोदधिजा ते
पद्मिणी लोकविश्रुता इन्दिरा लोकमाता मा रमा मंगलदेवता भा॰
र्गवी लोकजननी क्षीराब्धितनया तथा ११ शंखो लक्ष्मीपतेः पाञ्चज॰
न्यः १ चक्रं सुदर्शनः १ कौमोदकी गदा १ खड्गो नन्दकः १ कौस्तु॰
भो मणिः १ गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः नागान्तको वि
ष्णुरथः सुपर्णः पन्नगाशनः ९ शंभुरीशः पशुपतिः शिवः शूली महे
श्वरः ईश्वरः सर्व ईशानः शंकरश्चन्द्रशेखरः भूतेशः खण्डपरशुर्गिरी

अं
कों
५

शोगिरिशोमृडः मृत्युंजयः कृत्तिवासाः पिनाकीप्रमथाधिपः उग्रः
कपर्द्दीश्रीकंठः शितिकंठः कपालभृत् वामदेवोमहादेवोविरूपा
क्षस्त्रिलोचनः कृशानुरेताः सर्वज्ञोधूर्जटिर्नीललोहितः हरःस्म
रहरोभर्गस्त्र्यंबकस्त्रिपुरांतकः गंगाधरोंधकरिपुः क्रतुध्वंसीवृषध्व
जः व्योमकेशोभवोभीमःस्थाणूरुद्रउमापतिः महानटोऽष्टमूर्तिः
श्चाहिर्बुध्न्योवृषाकपिः भैरवःशिपिविष्टश्चगजारातिर्हरवल्लभा ५
५ कपर्दोस्यजटाजूटः २ पिनाकोऽजगवंधनुः २ प्रमथाःस्युःपा
हृपकोषं
रिषदाः २ गणाश्चापि ब्राह्मीत्याद्यास्तुमातरः २ भूतिर्विभूतिरैश्व ५

र्यमणिमादिकमष्टधा ९ उमाकात्यायनीगौरीकालीहैमवतीश्वरी
शिवाभवानीरुद्राणीशर्वाणीसर्वमंगला अपर्णापार्वतीदुर्गामृडा-
नीचंडिकांबिका जगन्मातांभैरवीचसतीदाक्षायणीतथा योगनि-
द्रामहामायागिरिजामेनकात्मजा गणांबिकादेवदेवीह्यार्याचकुल-
नायकाः विनायकोविघ्नराजद्वैमातुरगणाधिपाः अप्येकदंतहेरं-
बलंबोदरगजाननाः गांगेयाखुरथौ १० तंडुनंदिनौनंदिकेश्वरे व्र
कार्त्तिकेयोमहासेनःशरजन्माषडाननः पार्वतीनंदनःस्कंदःसेना-
नीरग्निभूर्गुहः बाहुलेयस्तारकजिद्विशाखःशिखिवाहनः षण्मातु

श्रे॰
को॰
५

रःशक्तिधरःकुमारःक्रौंचदारणः १०॥पावकिश्शृंगीभृंगीरिटिरिटिः क
र्ममोटीतुचामुंडाचर्ममुंडातुचर्चिका॥४ इंद्रोमरुत्वान्मघवाविडौ
जाःपाकशासनः वृद्धश्रवाःसुनासीरःपुरुहूतःपुरंदरः जिष्णु॰
र्लेखर्षभःशक्रःशतमन्युर्दिवस्पतिः सुत्रामागोत्रभिद्वज्रीवासवो
वृत्रहावृषा वास्तोष्पतिःसुरपतिर्बलारातिःशचीपतिः जम्भभे॰
दीहरिहयःस्वाराण्नमुचिसूदनः संक्रंदनोदुश्च्यवनस्तुराषाण्मे॰
घवाहनः आखंडलःसहस्राक्षऋभुक्षाः १५॥प्राचीनबर्हिर्बर्हि॰
हापृतनाषाट्पुलोमजित् उग्रधन्वाचोत्तस्यतुप्रियापुलोमजा॰ ५

शचींद्राणी ३ नगरीत्वमरावती हयउच्चैःश्रवाः १ सूतोमातलिः १
नंदनंवनं १ स्यात्प्रासादोवैजयंतः १ जयंतःपाकशासनिः २ ऐरा
वतोभ्रमातंगैरावणाभ्रमुवल्लभाः ५॥सुरगजोगजमल्लः॥ह्रादिनी
वज्रमस्त्रीस्यात्कुलिशंभिदुरंपविः शतकोटिःस्वरुःशंबोदंभोलिर
शनिर्द्वयोः १० व्योमयानंविमानोस्त्री २ नारदाद्याःसुरर्षयः १ स्या
त्सुधर्मादेवसभा १ पीयूषममृतंसुधा ३ मंदाकिनीवियद्गंगास्वर्ण
दीसुरदीर्घिका ४॥सिद्धसिंधुश्च॥मेरुःसुमेरुर्हेमाद्रीरत्नसानुःसु
रालयः ५ पंचैतेदेवतरवोमंदारःपारिजातकः संतानःकल्पवृक्ष

अ॰
को॰
१

पुंसि वा हरिचंदनं ५ सनत्कुमारो वैधात्रः २ स्वर्वैद्यावश्विनीसु-
तौ नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ १ स्त्रियां बहुष्वप्सर-
सः स्वर्वेश्या उर्वशीमुखाः घृताची मेनका रम्भा उर्वशी च तिलोत्तमा सु-
केशी मञ्जुघोषाद्याः कथ्यन्तेऽप्सरसो बुधैः हाहा हूहूश्चैवमाद्या गन्धर्वा-
स्त्रिदिवौकसां २ अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनंजयः कृपीटयो-
निर्ज्वलनो जातवेदास्तनूनपात् बर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केश-
उषर्बुधः आश्रयाशो बृहद्भानुः कृशानुः पावकोनलः रोहिताश्वो-
वायुसखः शिखावानाशुशुक्षणिः हिरण्यरेता हुतभुग्दहनो हव्य- १

वाहनः सप्तार्चिर्दमुनाः शुक्रः चित्रभानुर्विभावसुः शुचिरप्पित्तं १५
उषर्बुधः लारसभस्मभासितं और्वस्तु वाडवोवडवानलः ३ वह्ने
र्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखास्त्रियां ५ त्रिषुस्फुलिंगोग्निकणः
२ संतापः संज्वरः समौ २ धर्मराजः पितृपतिः समवर्तीपरेतराट् कृ
तांतोयमुनाभ्राताशमनोयमराड्यमः कालोदंडधरः श्राद्धदेवोवै
वस्वतोंतकः प्रेताधिपः पाशहस्तः कीनाशोमर्त्यशासनः राक्षसः
कौणपः क्रव्यात्क्रव्यादोस्रपआशरः रात्रिंचरोरात्रिचरः कर्बुरोनिक
षात्मजः यातुधानः पुण्यजनोनैर्ऋतोयातुरक्षसी २५ विधुवोपि

प्रचेतावरुणः पाशीयादसांपतिरप्पतिः ५ श्वसनःस्पर्शनोवायु
र्मातरिश्वासदागतिः पृषदश्वोगंधवहोगंधवाहानिलाशुगाः समी
रमारुतमरुज्जगत्प्राणसमीरणाः नभस्वद्वातपवनपवमानप्रभं
जनाः प्रकंपनश्चसमीरे १२ जङ्घालुष्णाकुलोमकात् १ हृत्याख्यना
भिकंठांतस्सर्वसंधिगताःक्रमात् प्राणापानसमानोदानव्यानाःपंच
वायवाः शरीरस्थाइमे ५ रंहस्तरसीतुरयःस्यदः जवःवाजोवेगश्च
अथशीघ्रंत्वरितंलघुक्षिप्रमरंद्रुतं सत्वरंचपलंतूर्णमविलंबित
माशुच ११ सततानारताश्रांतसंततविरतानिशं नित्यानवरताज

अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरं तीव्रैकांतनितांतानि गाढबा
ढदृढानि च ७४ क्लीबे शीघ्राद्यसत्वे स्यात्त्रिष्वेषां सत्वगामि यत् कुबेर
स्त्र्यंबकसखो यक्षराड्गुह्यकेश्वरः मनुष्यधर्मा धनदो राजराजो धनाधि
पः किन्नरेशो वैश्रवणः पौलस्त्यो नरवाहनः यक्षैकपिंगैडविडश्रीदपु
ण्यजनेश्वराः ७७ अस्योद्यानं चैत्ररथः २ पुत्रस्तु नलकूबरः २ कैलासः
स्थानं २ अलका पूः २ विमानं तु पुष्पकं २ स्यात्किन्नरः किंपुरुषस्तुरं
गवदनो मयुः ४ निधिर्ना शेवधिर्भेदाः शंखपद्मादयो निधेः निधिभेदाः
उक्तं च महापद्मश्च पद्मश्च शंखो मकरकच्छपौ मुकुंदकुंदनीलाश्च खर्वश्च

अं को ८

निधयोनव निधयः ५ इत्यमरकोशेस्वर्गादिकांडेस्वर्वर्गः प्रथमः
१ ॐ द्योदिवौद्वेस्त्रियामभ्रंव्योमपुष्करमंबरं नभोंतरिक्षंगगनमनंत
सुरवर्त्मखं वियद्विष्णुपदंवातुपुंस्याकाशविहायसी १५ विहाय
सोपिनाकोपिद्युरपिस्यात्तदव्ययं तारापथोंतरिक्षंमेघाध्वाच्यंतरिक्षंमहावि
ले २४ दिशस्तुककुभःकाष्ठाआशाश्चहरितश्चताः ८ प्राच्यवाचीप्र
तीच्यस्ताःपूर्वदक्षिणपश्चिमाः ३ उत्तरादिगुदीचीस्यात् २ दिश्यंतुत्रि
षुदिग्भवे १ इंद्रोवह्निःपितृपतिर्नैरृतोवरुणोमरुत् कुबेरईशःप
तयःपूर्वादीनांदिशांक्रमात् ८ ऐरावतःपुंडरीकोवामनःकुमुदोंज ८

नः पुष्पदंतः सार्वभौमः सुप्रतीकश्च दिग्गजाः ५ क्लीबाव्ययंत्वपदि
शं दिशोर्मध्ये विदिक्स्त्रियां अभ्यंतरंत्वंतरालं २ चक्रवालंतुमंड-
लं २ अभ्रंमेघोवारिवाहःस्तनयित्नुर्बलाहकः धाराधरोजलधरः
तडित्वान्वारिदोंबुभृत् घनजीमूतमुदिरजलमुग्धूमयोनयः १५
कादंबिनीमेघमाला २ त्रिषुमेघभवेऽभ्रियं १ स्तनितंगर्जितंमेघ-
निर्घोषेरसितादि च ४ शंपाशतह्रदाह्रादिन्यैरावत्यःक्षणप्रभा
तडित्सौदामिनीविद्युच्चंचलाचपलापिच १० स्फूर्जथुर्वज्रनिर्घो-
षे १ मेघज्योतिरिरम्मदः २ इंद्रायुधंशक्रधनुः २ तदेवऋजुरोहितं १

अं॰
को॰
९

9

वृष्टिर्वर्षं ॥ तद्विघातेवग्राहावग्रहौ समौ ॥ धारासंपातआसारः ॥
शीकरोंबुकणाः स्मृताः ॥ वर्षोपलस्तु करकाः ॥ मेघच्छन्नेह्नि दुर्दिनं
॥ अंतर्धा व्यवधा पुंसि त्वंतर्धिरपवारणं ॥ अपिधानतिरोधान
पिधानाच्छादनानि च ॥ ८ ॥ हिमांशुश्चंद्रमाश्चंद्र इंदुः कुमुदबांधवः ॥ वि
धुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः ॥ अब्जो जैवातृकः सोमो ग्लौ
र्मृगांकः कलानिधिः ॥ द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः ॥ रोहि
णीशः सुधासूतिरात्रेयोन्नेत्रनिर्गमः समुद्रनवनीतं च ॥ कला तु षो
डशो भागः ॥ बिंबोस्त्री मंडलं त्रिषु ॥ भित्तं शकलखंडे वा पुंस्यर्धो ध ९

धेंसमेंशके २ भागश्चैव चंद्रिकाकौमुदीज्योत्स्ना २ प्रसादस्तुप्र
सन्नता २ नैर्मल्यंच कलंकांकौलांछनंचचिह्नंलक्ष्मचलक्षणं ६
अभिख्यानंचसुषमापरमाशोभा २ शोभाकांतिर्द्युतिश्छविः ४ अव
श्यायस्तुनीहारः धूममहिषीधूमिकाच तुषारस्तुहिनंहिमं प्रालेयं
मिहिकाचा ५ थहिमानीहिमसंहतिः २ शीतंगुणे तद्वदर्थाःसुषी
मःशिशिरोजडः तुषारःशीतलःशीतोहिमःसप्तान्यलिंगकाः ७ ध्रु
वऔत्तानपादिःस्यात् १ अगस्त्यःकुंभसंभवः मैत्रावरुणिः ३ अस्यै
वलोपामुद्रासधर्मिणी १ नक्षत्रमृक्षंभंताराताराकाप्युडुवास्त्रियां ९

अ॰
को॰
१०

10

दाक्षायण्योऽश्विनीत्यादितारा अश्वयुगश्विनी राधाविशाखा २ पुष्येतु
सिध्यतिष्यौ २ श्रविष्ठया समाधनिष्ठाःस्युःप्रोष्ठपदाभाद्रपदाःस्त्रियः
२ मृगशीर्षंमृगशिरस्तस्मिन्नेवाग्रहायणी इन्वकास्तच्छिरोदेशेतार
कानिवसंतियाः १ रविःशुक्रोमहीसूनुस्तमोवैभानुजोऽब्जजः बुधो
बृहस्पतिश्चेतेदिशामेतेतथाग्रहाः बृहस्पतिःसुराचार्योगीष्पतिर्धि
षणोगुरुः जीवआंगिरसोवाचस्पतिश्चित्रशिखंडिजः ४ शुक्रोदैत्य
गुरुःकाव्यउशनाभार्गवःकविः ४ अंगारकःकुजोभौमोलोहितांगो
महीसुतः ५ वक्रश्चावक्र रौहिणेयोबुधःसौम्यःतत्स्थांडिविच्च समौ १०

सौरशनैश्चरौ शनिमंसौपंगुकालौछायायात्मजोसितस्तथा: ५ तम
स्तुराहुःस्वर्भानुःसैंहिकेयोविधुंतुदः ५ अभ्रपिशाचोग्रहकल्लो-
लश्च केतुःशिखी सप्तर्षयोमरीच्यत्रिमुखाश्चित्रशिखंडिनः ३
राशीनामुदयोलग्नं १ तेतुमेषवृषादयः सूरसूर्यार्यमादित्यद्वा-
दशात्मदिवाकराः भास्कराहस्करब्रध्नप्रभाकरविभाकराः भा-
स्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः विकर्तनार्कमार्तंडमिहिरा
रुणपूषणः द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः विभावसु-
र्ग्रहपतिस्त्विषांपतिरहर्पतिः भानुर्हंसःसहस्रांशुस्तपनःसविता

अ॰
को॰
११

रविः कर्मसाक्षी जगच्चक्षुरंशुमाली त्रयीतनुः प्रद्योतनो दिनम
णिः खद्योतो लोकबांधवः इनो भगो धामनिधिः पद्मिनीकांतह
स्त्वपि ४४ धाममणिर्व्योममणिः हेलिश्च माठरः पिंगलो दंडश्चंडां
शोः पारिपार्श्वकाः ३ सूर्यसूतो अरुणोऽनूरुः काश्यपिर्गरुडाग्रजः
५ परिवेशस्तु परिधिरुपसूर्यकमंडले किरणोस्रमयूखांशुगभ
स्तिघृणिपृश्नयः भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियां ११
स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः रोचिः शोचिरुभे
क्लीबे ११ प्रकाशो द्योत आतपः ३ आलोकश्च कोष्णं कवोष्णं मंदो ११

ष्णंकदुष्णंत्रिषुतद्वति ४ तिग्मंतीक्ष्णंखरंतद्वत् ३ मृगतृष्णामरी
चिका २ इत्यमरकोशेस्वर्गादिकांडेव्योमदिग्वर्गोद्वितीयः २ ॐ॥
कालोदिष्टोप्यनेहापिसमयोपि ४ अथपक्षतिः प्रतिपद्द्वेइमेस्त्रीत्वे
२ तदाद्यास्तिथयोद्वयोः २ घस्रोदिनाहनीवातुक्लीबेदिवसवासरौ
५ प्रत्यूषोहर्मुखंकल्यमुषःप्रत्युषसीअपि व्युष्टंविभातंगोसर्गः
प्रातस्तुवप्रभेवच्यं प्रभातेच ११ दिनांतेतुसायं २ संध्यापितृप्रसूः
२ प्राह्णापराह्णमध्याह्नास्त्रिसंध्यं २ अथशर्वरी निशानिशीथिनी
रात्रिस्त्रियामाक्षणदाक्षपा विभावरीतमस्विन्यौरजनीयामिनीतमी ११

अ॰
को॰
१२

तमाउषापि तमिस्रातामसीरात्रिः २ ज्यौत्स्नीचंद्रिकयान्विता २ आगा
मिवर्तमानाहर्युक्तायांनिशिपक्षिणी २ गणरात्रंनिशाबह्व्यः २ प्रदो
षोरजनीमुखं २ अर्धरात्रनिशीथौद्वौ २ द्वौयामप्रहरौसमौ २ सपर्वसं
धिःप्रतिपत्पंचदश्योर्यदंतरं पक्षांतौपंचदश्यौद्वे २ पौर्णमासीतुपू
र्णिमा २ कलाहीनेसानुमतिः २ पूर्णेराकानिशाकरे २ अमावस्या
त्वमावास्यादर्शःसूर्येंदुसंगमः ४ सादृष्टेंदुःसिनीवाली २ सानष्टें
दुकलाकुहूः २ उपरागोग्रहो २ राहुग्रस्तेत्विंदौचपूष्णिच सोपप्लवो
परक्तौद्वौअग्न्युत्पातउपाहितः २ एकयोक्त्यापुष्पवंतौदिवाकरनि १२

शाकरी २ अष्टादशनिमेषास्तुकाष्ठा २ त्रिंशत्तुताःकलाः २ ता॰
स्तुत्रिंशत्क्षणः २ तेतुमुहूर्तोद्वादशास्त्रियां २ तेतुत्रिंशदहोरात्रः॰
पक्षस्तेदशपंचच २ पक्षौपूर्वापरौशुक्लकृष्णौ २ मासस्तुतावुभौ २
द्वौद्वौमार्गादिमासौस्यादृतुः २ तैरयनंत्रिभिः २ अयनेद्वेगतिरुद॰
ग्दक्षिणार्कस्यवत्सरः २ समरात्रिंदिनेकालेविषुवंविषुवच्चतत् २
पुष्ययुक्तापौर्णमासीपौषी २ मासेतुयत्रसानाम्नाप्रसिद्धःपौषः २ मा॰
घाद्याश्चैवमेकादशापरे मार्गशीर्षेसहामार्गआग्रहायणिकश्चसः
४ पौषेतैषसहस्यौद्वौ ३ तपामाघे २ अथफाल्गुणेस्यात्तपस्यः॰

अ॰
को॰
१३
13

फाल्गुनिकः ३ स्याच्चैत्रे चैत्रिको मधुः ३ वैशाखे माधवो राधः ३
ज्येष्ठे शुक्रः २ शुचिरयमाषाढे २ श्रावणे तु स्यान्नभाः श्रावणि-
कश्च सः ३ स्युर्नभस्यप्रौष्ठपदभाद्रभाद्रपदाः समाः ४ स्यादाश्वि-
न इषोप्याश्वयुजोपि ३ स्यात्तु कार्तिके बाहुलोर्जौ कार्तिकिको ४
हेमन्तः शिशिरोस्त्रियां २ वसन्ते पुष्पसमयः सुरभिः ३ फल्गुश्च १
ग्रीष्म ऊष्मकः निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः ७ स्त्रियां प्रा-
वृट् स्त्रियां भूम्नि वर्षाः २ अथ शरत्स्त्रियां १ षडमी ऋतवः पुंसि मा-
र्गादीनां युगैः क्रमात् ऋतवः ६ संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शर १३

स्त्वमाः ४ मासेनस्यादहोरात्रःपैत्रः २ वर्षेणदैवतः २ दैवेयुगस
हस्रेद्वेब्राह्मणः २ कल्पौतुतौनृणां २ मन्वंतरंतुदिव्यानांयुगाना
मेकसप्ततिः संवर्तःप्रलयःकल्पःक्षयःकल्पांतइत्यपि ५ संहा
रोयुगात्ययःपरिवर्तश्च अस्त्रीपंकंपुमान्पाप्मापापंकिल्बिषकल्म
षं कलुषंवृजिनैनोघमंहोदुरितदुष्कृते किण्वमलश्च स्याद्धर्मं
मस्त्रियांपुण्यश्रेयसीसुकृतंवृषः ५ मुत्प्रीतिःप्रमदोहर्षःप्रमोदामो
दसंमदाः स्यादानंदथुरानंदःशर्मसातसुखानिच १२ श्वःश्रेयसं
शिवंभद्रंकल्याणंमंगलंशुभं भावुकंभविकंभव्यंकुशलंक्षेममस्त्रि

अ॰ को॰ १४

यां शस्तं च ५ प्रशस्ते निःश्रेयसं स्वस्त्यन्तं च अथ त्रिषु द्रव्ये पापपुण्य
सुखादि च मतल्लिका मचर्चिका प्रकाण्डमुद्घतल्लजौ प्रशस्तवाचकान्य
मूनि ५ अयः शुभावहो विधिः २ दैवं दिष्टं भागधेयं भाग्यं स्त्री नियति
र्विधिः ६ हेतुर्ना कारणं बीजं ३ निदानं त्वादिकारणं २ क्षेत्रज्ञ आ
त्मा पुरुषः ३ प्रधानं प्रकृतिः स्त्रियां २ विशेषः कालिकोऽवस्था गु
णाः सत्त्वं रजस्तमः ३ जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः ६
प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः ६ जातिर्जातं च सामा
न्यं ३ व्यक्तिस्तु पृथगात्मता २ चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं १४

मनः ७ इत्यमरकोशेस्वर्गादिकांडेकालवर्गःतृतीयः ३ ॐ बुद्धिर्म
नीषाधिषणाधीःप्रज्ञाशेमुषीमतिः प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञ
प्तिचेतनाः धीर्धारणावतीमेधा २ संकल्पःकर्ममानसं २ विकल्प
श्च चित्ताभोगोमनस्कारः २ समाधानमवधानेप्रणिधानेच चर्चासं
ख्याविचारणा ३ विचारोविमर्षोभावनावासनासंस्कारश्च अध्याहा
रस्तर्कऊहः ३ विचिकित्सातुसंशयः संदेहद्वापरौच ५ अथ सं
मौनिर्णयनिश्चयौ २ मिथ्यादृष्टिर्नास्तिकता २ व्यापादोद्रोहचिंत
नं २ समौसिद्धांतराद्धांतौ २ भ्रांतिर्मिथ्यामतिर्भ्रमः ३ संविदागूःप्र

अं॰ १५

तिज्ञानेनियमाश्रवसंश्रवाः अंगीकाराभ्युपगमप्रतिश्रवसमाधयः
१० मोक्षेधीर्ज्ञानं २ अन्यत्रविज्ञानंशिल्पशास्त्रयोः २ मुक्तिःकैव॰
ल्यनिर्वाणश्रेयोनिःश्रेयसामृतं मोक्षोपवर्गः ५ अथाज्ञानमविद्या
हंमतिःस्त्रियां ३ रूपंशब्दोगंधरसस्पर्शाश्चविषयाअमी गोचराइं॰
द्रियार्थाश्च ३ हृषीकंविषयींद्रियं ३ कर्मेंद्रियंतुपाय्वादि २ मनोने
त्रादिधींद्रियं २ तुवरस्तुकषायोस्त्री २ मधुरोलवणःकटुस्तिक्तो॰
म्लश्चरसाःपुंसि ५ तद्वत्सुषडमीत्रिषु २ विमर्दोत्थेपरिमलोगंधे
जनमनोहरे २ आमोदःसोतिनिर्हारी २ वाच्यलिंगत्वमागुणात् २ १५

समाकर्षी त्वनिर्हारी सुरभिर्घ्राणतर्पणः ४ इष्टगंधः सुगंधिः स्या

दामोदी मुखवासनः २ पूतिगंधिस्तु दुर्गंधः २ विस्रं स्यादामगंधि

यत् १ शुक्लशुभ्रशुचिश्वेतविशदश्येतपांडुराः अवदातः सितो॰

गौरोवलक्षो धवलोर्जुनः हरिणः पांडुरः पांडुः १६ ईषत्पांडुस्तु धू॰

सरः २ कृष्णनीलासितश्यामकालश्यामलमेचकाः ७ पीतो॰

गौरो हरिद्राभः पलाशो हरितो हरित् ३ लोहितो रोहितो रक्तः शो॰

णः कोकनदच्छविः ताम्रस्तु अव्यक्तरागस्त्वरुणः १ पीतरक्त॰

स्तु पिंजरः १ श्वेतरक्तस्तु पाटलः १ श्यावः स्यात्कापिशः २ धूम्र

अ॰
को॰
१९

धूमलौ कृष्णलोहिते १ कडारः कपिलः पिंगः पिशंगः कद्रुपिंग
लौ बभ्रुश्च चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे ९ गुणाः शु-
क्लादयः पुंसि गुणिलिंगास्तु तद्वति इत्यमरकोशे स्वर्गादिकांडे धी
वर्गः चतुर्थः ४ ॐ ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती १
व्याहार उक्तिर्लपितं भाषितं वचनं वचः ९ अपभ्रंशोऽपशब्दः स्यात्
१ शास्त्रे शब्दस्तु वाचकः १ तिङ्सुबंतचयो वाक्यं क्रिया वा कार-
कान्विता श्रुतिः स्त्री वेद आम्नायस्त्रयी ४ निगमः त्रयी धर्मस्तु त-
द्विधिः १ स्त्रियामृक्सामयजुषी इति वेदास्त्रयस्त्रयी १ शिक्षेत्या १९

दिङ्मात्रेऽङ्गं २ ओंकारप्रणवौ समौ इतिहासः पुरावृत्तं २ उदात्ता-
द्यास्त्रयः स्वराः २ आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः २
आख्यायिकोपलब्धार्था २ पुराणं पञ्चलक्षणं २ प्रबन्धकल्पना
कथा प्रवह्लिका प्रहेलिका २ सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तरा-
णि च वंशानुवंशचरितं पुराणं पञ्चलक्षणं स्मृतिस्तु धर्मसंहिता
समाहृतिस्तु संग्रहः २ समस्या तु समासार्था २ किंवदन्ती जन-
श्रुतिः वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यात् ४ अथाह्वयः आख्याह्वे
अभिधानं च नामधेयं च नाम च ९ इतिनाकावरणाह्वानेसंहृतिबे-

अ॰
को॰
१७
17

ऽभिकृता २ विवादो व्यवहारः स्यात् २ उपन्यासस्तु वाङ्मुखं २
उपोद्घात उदाहारः २ शपनं शपथः पुमान् २ शपथ प्रश्नोऽनुयो
गः पृच्छा च प्रतिवाक्योत्तरे समे २ मिथ्याभियोगोऽभ्याख्यानं २
अथ मिथ्याभिशंसनं अभिशापः प्रणादस्तु शब्दः स्यादनुरागजः
२ यशः कीर्तिः समाज्ञा च ३ श्लोकोऽभिख्या च स्तवः स्तोत्रं नुतिः
स्तुतिः ४ आम्रेडितं द्विस्त्रिरुक्तं १ उच्चैर्घुष्टं तु घोषणा २ काकुः
स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः १ अवर्णाक्षेपनिर्वादपरी
वादापवादवत् उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे १० पा॰ १७

हष्ठमनिर्वादः स्यात् २ भर्त्सनंत्वपकारगीः २ यः सनिन्दउपालं
भस्तत्रस्यात्परिभाषणं २ तत्रत्वाक्षारणायः स्यादाक्रोशोमैथुनंप्र॰
ति स्यादाभाषणमालापः २ प्रलापोनर्थकंवचः २ अनुलापोमु॰
हुर्भाषा २ विलापः परिदेवनं २ विप्रलापोविरोधोक्तिः २ संला॰
पोभाषणंमिथः २ संकथापिसुप्रलापः सुवचनं २ अपलापस्तु॰
निह्नवः २ चोद्यमाक्षेपाभियोगौशापाक्रोशौदुरीषणा अस्त्रीचाटु
चटुप्रेमश्लाघामिथ्याविकत्थनं संदेशवाग्वाचिकंस्यात् २ वाग्भे
दास्तुत्रिषूत्तरे रुषतीवागकल्याणी २ स्यात्कल्यातुशुभात्मिका॰

अ॰
को॰
१८
18

अत्यंतमधुरेसांत्वं २ संगतेहृदयंगमं २ निष्ठुरंपरुषं २ विरुद्धे
व ग्राम्यमश्लीले २ सूनृतंप्रियेसत्ये २ अथसंकुलक्लिष्टेपरस्प
रपराहते २ लुप्तवर्णपदंग्रस्तं २ निरस्तंत्वरितोदितं २ अंबूकृ
तंसनिष्ठेवं २ अबद्धंस्यादनर्थकं अनक्षरमवाच्यंस्यात् २ आहतं
तुमृषार्थकं अथम्लिष्टमविस्पष्टंवितथंत्वनृतंवचः २ सोल्लुंठनं
तुसोत्प्रासंमणितंरतिकूजितं श्राव्यंहृद्यंमनोहारि २ विस्पष्टं
प्रकटोदितं सत्यंतथ्यमृतंसम्यक् ५ अमूनित्रिषुतद्वति शब्दे
निनादनिनदध्वनिध्वानरवस्वनाः स्वाननिर्घोषनिर्ह्रादनादनि १८

स्वाननिस्वनाः आरवारावसंरावविरावाः ९ अथमर्मरः स्वनिते
वस्त्रपर्णानां १ भूषणानांतुशिंजितं १ निक्वाणोनिक्वणःक्वाणः
क्वणःक्वणनमित्यपि ५ वीणायाःक्वणितेप्रादेःप्रक्वाणप्रक्वणा
दयः कोलाहलःकलकलःतिरश्चांवाशितंरुतं १ स्त्रीप्रतिश्रुत्प्र
तिध्वाने १ प्रतिश्रुत्काप्रतिध्वनि गीतिस्तुगेयंगांधर्वंगीतंगानमि
मेसमे १ इत्यामरकोशेस्वरादिकांडेशब्दादिवर्गःपंचमः ५ ॐ
निषादर्षभगांधारषड्जमध्यमधैवताः पंचमश्चेत्यमीसप्ततंत्री
कंठोत्थिताःस्वराः ७ काकलीतुकलेसूक्ष्मे १ ध्वनौतुमधुरस्फु

अ॰ को॰ १९

19

टेकलः २ मंद्रस्तुगंभीरेतारोत्युच्चैः २ त्रयस्त्रिषु समन्वितलय॰
स्त्वेकतालः २ वीणातुवल्लकी विपंचीसातुतंत्रीभिःसप्तभिःप॰
रिवादिनी २ घोषवतीच ततंवीणादिकंवाद्यमानद्धंमुरजादिकं
२ वंशादिकंतुसुषिरं २ कांस्यतालादिकंघनं २ चतुर्विधमिदंवा
द्यंवादित्रातोद्यनामकं २ मृदंगामुरजा २ भेदाआंक्यालिंग्योर्ध्वका
स्त्रयः २ स्याद्यशःपटहोढक्का २ भेरीस्त्रीदुंदुभिःपुमान् २ आ
नकःपटहोस्त्रीस्या २ कोणोवीणादिवादनं वीणादंडःप्रवालःस्या
त् २ ककुभस्तुप्रसेवकः २ कोलंबकस्तुकायोस्याः २ उपनाहो १९

निबंधने वाद्यप्रभेदाडमरुमड्डुडिंडिमझर्झराः मर्दलःपणवोन्ये
च १ नर्तकीलासिकेसमे अतिलासिकाच विलंबितंद्रुतंमध्यं
तत्वमोघोघनंक्रमात् ३ तालःकालक्रियामानं लयःसाम्यं १
अथास्त्रियांताडवंनटनंनाट्यंलास्यंनृत्यंचनर्तने काहलातुर्यंभो
डीस्यात् १ मुखवाद्यःपंचमेधयः २ तौर्यत्रिकंनृत्तगीतवाद्यंनाट्य
मिदंत्रयं २ भ्रुकुंसश्चभ्रकुंसश्चभ्रूकुंसश्चेतिनर्तकः स्त्रीवेशधारी
पुरुषः ३ नाट्योक्तौगणिकाज्जुका २ भगिनीपतिरावुत्तो १ भा
वोविद्वान् १ अथावुकौ मान्योभावेतिवक्तव्यः किंचिदूनस्तुमारि

अं०
को०
२०
20

षः जनकः युवराजस्तुकुमारोभर्तृदारकः ३ राजाभट्टारकोदे
देवः २ तत्सुताभर्तृदारिका २ देवीकृताभिषेकायां २ इतरासु
तुभट्टिनी २ अब्राह्मण्यमवध्योक्तौ २ राजश्यालस्तुराष्ट्रियः २
अम्बामाता २ अथबालास्याद्वासूः २ आर्यस्तुमारिषःमार्षश्च २
अत्तिकाभगिनीज्येष्ठा २ निष्ठानिर्वहणेसमे २ हंडेहंजेहलाह्वा
नेनीचांचेटींसखींप्रति ३ अंगहारोंगविक्षेपः २ व्यंजकाभिन
यौसमौ २ निर्वृत्तेत्वंगसत्वाभ्यांद्वेत्रिष्वांगिकसात्विके २ शृंगार
वीरकरुणाद्भुतहास्यभयानकाः बीभत्सरौद्रौचरसाः ८ शृंगारः २०

शुचिरुज्ज्वलः ३ उत्साहवर्धनोवीरः २ काकरुण्यंकरुणाघृणा कृ
पादयानुकंपाचाप्यनुक्रोशोपि ७ अथोहसः हासोहास्यंच ३ बी
भत्संविकृतंत्रिष्विदंद्वयं विस्मयोद्भुतमाश्चर्यंचित्रमपि ४ अथ
दारुणं भैरवंभीषणंभीष्मंघोरंभीमंभयानकं भयंकरंप्रतिभयं
९ रौद्रंतूग्रं २ अमीत्रिषु चतुर्दशदरस्त्रासोभीतिभीःसाध्वसंभ
यं ६ विकारोमानसोभावः १ अनुभावोभाववोधकः २ गर्वोभि
मानोहंकारः ३ मानश्चित्तसमुन्नतिः अवलेपश्चममतास्मयोहं
ताभवेत्तस्त्रियां अनादरःपरिभवःपरीभावस्तिरस्क्रिया रीढाव

अ॰ को॰ २२

21

माननावज्ञावहेलनमसूर्क्षणं ५ निकारोभिभवःपराभवोन्य॰
क्‌कारश्च मंदाक्षंह्रीस्त्रपाव्रीडालज्जा ५ सापत्रपान्यतः २ क्षांति
स्तितिक्षा २ ह्यमासहनेच अभिध्यातुपरस्वविषयेस्पृहा २ अक्षां॰
तिरीर्षा २ मात्सर्यंच अस्सूयातुदोषारोपोगुणेष्वपि २ वैरंविरोधो
विद्वेषः २ द्वेषश्च मन्युशोकौतुशुक्स्त्रियो ३ पश्चात्तापोनुता॰
पश्चविप्रतीसारइत्यपि २ विप्रतिसारोनुशयश्च कोपक्रोधामर्॰
षरोषाः प्रतिघोरुट्क्रुधौस्त्रियौ ७ मन्युश्च शुचौतुचरितेशीलं
२ चरित्रंचारित्रंच उन्मादश्चित्तविभ्रमः २ प्रेमानाप्रियताहार्दंप्रेम २२

न्मादश्चित्तविभ्रमः २ प्रेमानाप्रियताहार्दं प्रेमस्नेहः ५ अथदोहदं

इच्छाकांक्षास्पृहेहातृड्वांछालिप्सामनोरथः कामोभिलाषस्तर्ष

श्च १२ मनोगवीच सात्यर्थेलालसाद्वयोः २ उपाधिर्नाधर्मचिंता

१ पुंस्याधिर्मानसीव्यथा २ स्याच्चिंतास्मृतिराध्यानं ३ उत्कंठोत्क

लिकेसमे २ उत्साहोध्यवसायःस्यात् २ उद्योगोद्यमौच सवीर्यं

मतिशक्तिभाक् कपटोस्त्रीव्याजदंभोपधयश्छद्मकैतवे ६ कुसृति

निकृतिःशाठ्यं ३ कुतुकंतुकुतूहलं कौतूहलंकौतुकंच ४ प्र

मादोनवधानता २ स्त्रीणांविलासोविब्बोकोविभ्रमोललितंतथा

अ॰
को॰
२२
22

हेलालीलेत्यमी हावाः क्रियाः शृंगारभावजाः १ लीलाविलासौ वि॰
च्छित्तिर्विभ्रमः किलकिंचितं मोट्टायितं कुट्टमितं बिब्बोको ललितं त॰
था विहृतं चेति मंतव्या दश स्त्रीणां स्वभावजाः प्रियस्यानुकृतिर्ली॰
ला श्लिष्टैर्वाग्वेषचेष्टितैः विलासो गतिविशेषो यः प्रियाप्तमननादि॰
७ हर्षाद्रुदितगीतादिव्यामिश्रं किलकिंचितं मोट्टायितं प्रियं स्म॰
त्वा संगमहार्हे विजृंभणं दुःखोपचारः सौख्येपि हर्षात्कुट्टमितं मतं
बिब्बोकोभिमतप्राप्तावपि गर्वादनादरः अनाचार्योपदिष्टं स्याल्ल॰
लितं रतिचेष्टितं वक्तव्याभाषणं व्याजाद्विहृतं दर्शितेंगितं हवःके २२

लिः परीहासः क्रीडा लीला नर्म च व्याजोपदेशो लक्ष्यं च २ वर्क॰
रोपि क्रीडा खेला च कूर्दनं २ घर्मो निदाघः स्वेदः स्यात् २ प्रलयो
नष्टचेष्टता १ अवहित्थाकारगुप्तिः समौ संवेगसंभ्रमौ १ आवेगश्च
स्यादाच्छुरितकं हासः सोत्प्रासः १ स मनाक्स्मितं मध्यमः स्याद्विह॰
सितं १ रोमाञ्चो रोमहर्षणं १ पुलको लोमविक्रिया च क्रन्दितं रुदि॰
तं क्रुष्टं २ जृम्भस्तु त्रिषु जृम्भणं १ विप्रलम्भो विसंवादो १ रिङ्खणं स्ख॰
लनं समे १ स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि ५ तन्द्री प्रमी॰
ला १ भ्रुकुटिः भ्रूकुटिः भृकुटिः स्त्रियां अदृष्टिः स्यादसौम्येक्षिणि १ सं

अ॰
को॰
२३

सिद्धिप्रकृती त्विमे स्वरूपं च स्वभावश्च निसर्गश्च ५ अथ वेपथुः कंपः
२ अथ क्षण उद्धर्षो मह उद्धव उत्सवः ५ इत्यमरकोशे स्वर्गादिकांडे॰
नाट्यवर्गः ७ ॥ ९ ॐ अधोभुवनपातालं बलिसद्म रसातलं नागलो
कः ५ अथ कुहरं शुषिरं विवरं बिलं छिद्रं निर्व्यथनं रोकं रंध्रं श्वभ्रं व
पा सुषिः ११ गर्तावटौ भुवः श्वभ्रे सरंध्रे शुषिरं त्रिषु २ अंधकारोस्त्रि॰
यां ध्वांतं तमिस्रं तिमिरं तमः ५ भूमिच्छायायाव ध्वांते गाढेंधतमसं
२ क्षीणेवतमसं २ तमो विष्वक्संतमसं २ नागाः काद्रवेयाः २ त
दीश्वरः शेषोनंतः २ वासुकिस्तु सर्पराजः २ अथ गोनसे तिलि॰ २३

23

त्सः स्यात् २ गोनासोवार्तिकश्च अजगरेशयुर्वाहसइत्युभौ ३ अ
चलश्चक्रमंडलीच अलगर्दोजलव्यालः २ अलीगंधइत्येके स
मौराजिलडुंडुभौ २ मालुधानोमातुलाहिः २ निर्मुक्तोमुक्तकं
चुकः २ सर्पःपृदाकुर्भुजगोभुजंगोहिर्भुजंगमः आशीविषोविष
धरश्चक्रीव्यालःसरीसृपः कुंडलीगूढपाच्चक्षुःश्रवाःकाकोदरः
फणी दर्वीकरोदीर्घपृष्ठोदंदशूकोविलेशयः उरगःपन्नगोभो
गीजिह्मगःपवनाशनः २५ कुंभेनसोलेलिहानःकंचुकीराजस
र्पकः भुजंगभुक् त्रिष्वाहेयंविषास्थ्यादि १ स्फटायांतुफणाद्वयोः २

अ॰
को॰
२४
24

दर्विः कफेलश्च समौ कंचुकनिर्मोकौ २ अहित्वक्कनिर्ल्वयनीव
क्ष्वेडस्तु गरलं विषं ३ गरश्च पुंसि क्लीबे च काकोलकालकूटह
लाहलाः सौराष्ट्रिकः शौल्किकेयः ब्रह्मपुत्रः प्रदीपनः दारदोव
त्सनाभश्च विषभेदा अमी नव ५ हालाहलं हालहलं च हालहल
शहोपि मेवेन स्वकाख्ये स्थापितः विषवैद्यो जांगुलिकः २ व्या॰
लग्राह्याहितुंडिकः २ इत्यमरकोशे स्वर्गादिकांडे पातालभो॰
गिवर्गः समाप्तः ७ ॐ स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियां
तद्भेदास्तपनावीचिमहारौरवरौरवाः संहारः कालसूत्रं चेत्याद्याः १ २४

परेतास्तु वैतरणी सिंधुः १ स्यादलक्ष्मीस्तु निर्ऋतिः १ विष्टिरा॰
जूः कारणा तु यातना तीव्रवेदना ३ पीडा बाधा व्यथा दुःखमाम॰
नस्यं प्रसूतिजं स्यात्कष्टं कृच्छ्रमाभीलं ३ त्रिष्वेषां भेद्यगामि य॰
त् इत्यमरकोशे स्वर्गादिकांडे नरकवर्गः अष्टमः ५ ॐ समुद्रो॰
ऽब्धिरकूपारः पारावारः सरित्पतिः उदन्वानुदधिः सिंधुः सरस्वा॰
न्सागरोऽर्णवः रत्नाकरो जलनिधिः यादस्पतिरपांपतिः वीचि॰
मालो नदीनाथो वारिधिर्झषध्वजः ५ अवारपारः पाथोधिस्त॰
स्य प्रभेदाः क्षीरोदो लवणोदस्तथापरे ७ आपः स्त्री भूम्नि वार्वारि

अ॰
को॰
२५
25

सलिलंकमलंजलं पयःकीलालममृतंजीवनंभुवनंवनं कबं
धमुदकंपाथःपुष्करंसर्वतोमुखं अंभोर्णस्तोयपानीयनीरक्षीरां
बुशंबरं मेघपुष्पंघनरसः २७ दकंजीवनीयंच त्रिषुद्वेआप्य
मम्मयं २ भंगस्तरंगऊर्मिर्वास्त्रियांवीचिः ४ अथोर्मिषुमहत्सू
ल्लोलकल्लोलौ २ लहरीउ[illegible] स्यादावर्तोम्भसांभ्रमः २ पृषंति
बिंदुपृषताः पुमांसोविप्रुषःस्त्रियः ४ चक्राणिपुटभेदास्यु २ भ्र
मश्चजलनिर्गमः २ कूलंरोधश्चतीरंचप्रतीरंचतटंत्रिषु ५ पा
रावारेपरार्वाचीतीरे २ पात्रंतदंतरं २ द्वीपोस्त्रियामंतरीपंयदं २५

न्तर्वारिणस्तटं २ तोयोत्थितं तत्पुलिनं २ सैकतं सिकतामयं २
निषद्वरस्तु जम्बालः पंकोस्त्री शादकर्दमौ ५ जलोच्छ्वासाः परीवा
हाः २ कूपकास्तु विदारकाः नाव्यं त्रिलिंगं नौतार्ये २ स्त्रियां नौस्त
रणिस्तरिः ३ उडुपं तु प्लवः कोलः २ स्रोतोम्बुसरणं स्वतः २ आ
तरस्तरपण्यं स्यात् २ द्रोणी काष्ठाम्बुवाहिनी २ सांयात्रिकः पोत
वणिक् २ कर्णधारस्तु नाविकः २ नियामकः पोतवाहः २ नियो
माश्च कूपको गुणवृक्षकः नौकादंडः क्षेपणी स्यात् २ अरित्रं के°
निपात्रकं स्फुट्टकोटिपात्रं च अभ्रिः स्त्री काष्ठकुद्दालः २ सेकपात्रं

अ॰
को॰
२५
26

त्तु सेचने १ यानपात्रे तु पोतः १ अब्धिभवे त्रिषु समुद्रिये १ सांयु॰
त्रिको मत्स्युष्णोऽब्धिभवः १ सांयात्रिका तनोः १ क्लीबेर्धनावं नावोर्धे १
अतीतनौकेतितु त्रिषु १ त्रिष्वागाधात् प्रसन्नोऽच्छः १ कलुषोन
च्छ आविलः निम्नं गभीरं गंभीरं ३ उत्तानं तद्विपर्यये १ अगाधमत॰
लस्पर्शे १ कैवर्ते दाशधीवरौ आनायः पुंसि जालं स्यात् १ शण॰
सूत्रं पवित्रकं मत्स्याधानी कुवेणी स्यात् वडिशं मत्स्यवेधनं २ पृ॰
थुरोमा झषो मत्स्यः मीनो वैसारिणोऽण्डजः विसारः शकलीच प
शल्कीच अथ गडुकः शकलार्भकः १ सहस्रदंष्ट्रः पाठीनः २३ २५

लूपीशिशुकःसमौ २ नलमीनश्चिलिचिमः २ प्रोष्ठीतुशफ॰
रीद्वयोः २ क्षुद्राण्डमत्स्यसंघातःपोताधाने २ अथोझषः रोहितो
मद्गुरःशालोराजीवःशकुलस्तिमिः तिमिंगिलादयः ७ चाथया
दांसिजलजंतवः २ तद्भेदाःशिशुमारोद्रशंकवोमकरा
दयः ५ स्यात्कुलीरःकर्कटकः २ कूर्मेकमठकच्छपौ २ ग्राहोव
हारः २ नक्रस्तुकुंभीरः २ अथमहीलतागंडूपदःकिंचुलकः २
निहाकागोधिकासमे २ रक्तपातुजलौकायांस्त्रीभूम्निजलौक
सः २ मुक्तास्फोटःस्त्रियांशुक्तिः २ शंखःस्यात्कम्बुरस्त्रियौ २ क्षु

+ भेकेमंडूकवर्षाभूशालूरप्लवदर्दुराः ४ शिलीगंडूपदी २ भेकीवर्षाह्वी २ कमठीडुलिः १+

अ॰ को॰ २२ क्षुद्रशंखाःशंखनखाः २ शम्बूकाजलशुक्तयः २ कूर्मीच मद्गुरस्य॰
प्रियाशृंगी २ दुर्नामादीर्घकोशिका २ जलाशयोजलाधारः २ त॰
त्रागाधजलेह्रदः २ आहावस्तुनिपानंस्यादुपकूपजलाशये २ पुं॰
स्येवांधुःप्रहीकूपउदपानंतुपुंसिवा ४ नेमिस्त्रिकास्य २ वीनाहोमु
खबंधनमस्ययत् २ पुष्करिण्यांतुखातंस्यात् २ अखातंदेवखात
के २ पद्माकरस्तडागोस्त्रीकासारःसरसीसरः ५ वेशंतःपल्वलं॰
चाल्पसरः २ वापीतुदीर्घिका २ खेयंतुपरिखा २ आधारस्त्वम्भ॰
सांयत्रधारणम् २ स्यादालवालमावालमावापः अथनदीसरित् १ २२

नदीसरिच्छैवलिनीतटिनीह्रादिनीधुनी स्रोतस्वतीद्वीपवतीस्र
वंतीनिम्नगापगा कूलंकषानिर्झरिणीरोधोवक्रासरस्वती गं१
गाविष्णुपदीजह्नुतनयासुरनिम्नगा भागीरथीत्रिपथगात्रिस्रो
ताभीष्मसूरपि ८ कालिंदीसूर्यतनयायमुनाशमनस्वसा ४
रेवातुनर्मदासोमोद्भवामेकलकन्यका ४ करतोयासदानीरा २
बाहुदासैतवाहिनी २ अर्जुनीकथितासैवकांतवीर्यावतारिता १
शतद्रुस्तुशुतुद्रिःस्यात् २ विपाशातुविपाट्स्त्रियां २ शोणोहि'
रण्यवाहःस्यात् २ कुल्याल्पाकृत्रिमासरित् २ शरावतीवेत्रवती

अ॰
को॰
२८
९६

चंद्रभागासरस्वती कावेरीसरितोन्याश्च ५ संभेदःसिंधुसंगमः
द्वयोःप्रणालीपयसःपदव्यां २ त्रिषूत्तरौ देविकायांसरय्वांच
भवेदाविकसारवौ २ सौगंधिकंतुकल्हारं २ हल्लकंरक्तसंधिकं
२ स्यादुत्पलंकुवलयं २ अथनीलांबुजन्मच इंदीवरंचनीलेस्मिन् २
सितेकुमुदकैरवे २ शालूकमेषांकंदःस्यात् २ वारिपर्णीतुकुंभि
का जलनीलीतुशैवालंशैवलः ३ अथकुमुद्वतीकुमुदिन्यां २
नलिन्यांतुबिसिनीपद्मिनीमुखाः २ वापुंसिपद्मंनलिनमरविं
दंमहोत्पलं सहस्रपत्रंकमलंशतपत्रंकुशेशयं पंकेरुहंतामरसं २८

सारसंसरसीरुहं बिसप्रसूनराजीवपुष्कराम्भोरुहाणि च नालीकं
च पुंडरीकंसिताम्भोजं २ अथरक्तसरोरुहे रक्तोत्पलंकोकनदं ३
नालोनालं २ अथास्त्रियां मृणालंबिसं २ अब्जादिकदंबेषंडमः
स्त्रियां १ करहाटःशिफाकंदे २ किंजल्कःकेसरोस्त्रियां २ संवर्
तिकानवदलं २ बीजकोशोवराटकः ३ कर्णिकाच इत्यमरको
रि + उक्तंस्वर्व्योमदिक्कालधीशब्दादिसनाट्यकं पातालभोगिनरकंवारिचैषांचसंगतं इतिअमरकोशेस्वर्गादिकांडः प्रथमःसमाप्तः ॥१॥
शेस्वर्गादिकांडेवारिवर्गःसमाप्तः ॥११+ ॐवर्गाःपृथ्वीपुरक्ष्माभृद्वनौ
षधिमृगादिभिः नृब्रह्मक्षत्रविट्शूद्रैःसांगोपांगैरिहोदिताः ॐ
भूर्भूमिरचलानंतारसाविश्वंभरास्थिरा धराधरित्रीधरणिःक्षोणि

अ॰ को॰ २९ 29

ज्याकाश्यपीक्षितिः सर्वंसहावसुमतीवसुधोर्वीवसुंधरा गोत्राकुः
पृथिवीपृथ्वीक्ष्मावनिर्मेदिनीमही भूतधात्रीरत्नगर्भाविपुलासाग
राम्बरा रत्नवतीभारवती भराजगतीगौःक्षमाइलाच मृन्मृत्तिका
२ प्रशस्तातुमृत्स्नामृत्साचमृत्तिका २ उर्वरासर्वसस्याढ्या २ स्यादू
षः क्षारमृत्तिका २ ऊषवानूषरोद्वावप्यन्यलिंगौ २ स्थलंस्थली
२ समानौमरुधन्वानौ २ द्वेखिलाप्रहतेसमेत्रिषु २ द्योजगतीलो॰
कोविष्टपंभुवनंजगत् लोकोयंभारतंवर्षं २ शरावत्यास्तुयोवधेः
देशःप्राग्दक्षिणःप्राच्यःउदीच्यःपश्चिमोत्तरः हिमवद्विंध्ययोरंतर्यत् २९

प्राग्विनशनादपि प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः प्र॰
त्यन्तो म्लेच्छदेशः स्यात् २ मध्यदेशस्तु मध्यमः २ आर्यावर्तः पुण्य॰
भूमिर्मध्यं विन्ध्यहिमागयोः २ नीवृज्जनपदौ २ देशविषयौ तूपवर्त
नं २ त्रिष्वागोष्ठान्नड्प्रायेनड्वान्नड्वल इत्यपि २ कुमुद्वान्कुमुदप्रा॰
ये २ वेतस्वान्बहुवेतसे २ शाद्वलः शादहरिते २ सजम्बाले तु पं॰
किलः जलप्रायमनूपं स्यात् २ पुंसि कच्छस्तथाविधः २ स्त्री शर्क
रा शर्करिलः शार्करः शर्करावति देश एवादिमा ५ एवमुन्नेयाः सि
कतावति ४ देशो नद्यम्बुवृष्ट्यम्बुसंपन्नव्रीहिपालितः स्यान्नदीमा॰

अ॰
को॰
३०
30

त्वकोदेवमातृकश्चयथाक्रमं २ सुराज्ञिदेशेराजन्वान्स्यात्ततोन्यत्र
राजवान् २ गोष्ठंगोस्थानकं २ तत्तुगौष्ठीनंभूतपूर्वकं २ पर्यंतभूः
परिसरःसेतुरालिःस्त्रियांपुमान् २ वामलूरश्चनाकुश्चवल्मीकं
पुंनपुंसकं अयनंवर्त्ममार्गाध्वपंथानःपदवीसृतिः सरणिःपद्धतिः
पद्यावर्त्तन्येकपदीतिच २ अतिपंथाःसुपंथाश्चसत्पथश्चार्चितेध्व
नि २ व्यध्वोदुरध्वोविपथःकदध्वःकापथःसमाः ५ अपंथास्त्वप
थं २ तुल्येशृंगाटकचतुष्पथे २ संस्थानेचत्वरेच प्रांतरंदूरशू
न्योध्वा २ कांतारंवर्त्मदुर्गमं २ गव्यूतिःस्त्रीक्रोशयुगं २ नल्वःकि ३०

ष्कुचतुःशतः घंटापथः संसरणं २ तत्पुरस्योपनिष्करं द्यावा
पृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी दिवस्पृथिव्यौ गंजा तु रुमा
स्याल्लवणाकरः ३ इत्यमरकोशे द्वितीयकांडे भूवर्गः प्रथमः
१ ॐ पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनं स्थानीयं निगमः अ
धिष्ठानं दुर्गं कोट्टं राजधानी च अन्यत्तु यन्मूलनगरात्पुरं तच्छा
खानगरं १ वैश्यो वेश्याजनसमाश्रयः स्यात्साकेतमयोध्यायां
१ विदेहा मिथिलापुरी २ महोदयः कन्यकुब्जः कन्यकुब्जं महोद
यं काशी वाराणसी २ अवंती विशाला वोज्जयन्यपि प्राग्ज्योतिषं

अ॰
को॰
३२
31

कामपुरं द्वारका द्वारवत्यपि आपणस्तु निषद्यायां २ विपणिः प-
ण्यवीथिका २ रथ्याप्रतोलीविशिखा ३ स्याच्चयो वप्रमस्त्रियां २
प्राकारो वरणः सालः ३ प्राचीनं प्रान्ततो वृतिः वाटो वाटी आवेशक
श्च भित्तिः स्त्री कुड्यं २ एडूकं तदन्तर्न्यस्तकीकसे २ गृहं गेहोदवसि
तं वेश्म सद्म निकेतनं निशान्तपस्त्यसदनं भवनागारमन्दिरं गृहाः
पुंसि च भूम्न्येव निकाय्यनिलयालयाः वासः कुटी द्वयोः शाला स-
भा २० वसतिर्वास्ततेयो निवेशनं आवसथः संतल्पायस्तु संजवनं-
त्विदं चतुःशालं मुनीनां तु पर्णशालोटजोऽस्त्रियां चैत्यमायतनं तु ३२

ल्ये २ स्त्रपञ्च वाजिशाला तु मन्दुरा २ आवेशनं शिल्पिशाला २
प्रपा पानीयशालिका २ मठश्छात्रादिनिलयः २ बौद्धानां तु विहा
रोस्त्री सत्रशाला प्रतिश्रयः २ गंजा तु मदिरागृहं २ गर्भागारं वा
सगृहं अरिष्टं सूतिकागृहं २ कुट्टिमोस्त्री निबद्धा भूश्चंद्रशाला शि
रोगृहं वातायनं गवाक्षः २ अथ मंडपोस्त्री जनाश्रयः २ हर्म्यादि
धनिनां वासः २ प्रासादो देवभूभुजां २ सौधोस्त्री राजसदनं २ उ
पकार्योपकारिका २ स्वस्तिकः सर्वतोभद्रो नंद्यावर्तादयोपि च वि
च्छंदकप्रभेदा हि भवंतीश्वरसद्मनां स्त्र्यगारं भूभुजामंतःपुरं स्याद

अं॰ को॰ ३२ 32

वरोधने शुद्धांतश्चावरोधश्च ४ स्यादट्टःक्षौममस्त्रियां २ प्रघाण

प्रघणालिंदा बहिर्द्वारप्रकोष्ठके ३ गृहावग्रहणीदेहली २ अंग

णंचत्वराजिरे ३ अधस्ताद्दारुणिशिला २ नासादारूपरिस्थितं २

प्रच्छन्नमंतर्द्वारंस्यात् २ पक्षद्वारंतुपक्षकः २ वलीकनीध्रेपटलप्रां

ते २ अथपटलंछदिः २ गोपानसीतुवलभीछादनेवक्रदारुणि

२ कपोतपालिकायांतुविटंकंपुंनपुंसकं २ स्त्रीद्वार्द्वारंप्रतीहारः

३ स्याद्वितर्दिस्तुवेदिका २ तोरणोस्त्रीबहिर्द्वारं २ पुरद्वा

रंतुगोपुरं २ कूटंपूः २ द्वारियद्धस्तिनखस्तस्मिन् २ अथत्रिषुक ३२

वाटमररं तुल्ये २ तद्विष्कम्भोर्गलं न ना २ परिघस्य आरोहणं

स्यात्सोपानं २ निःश्रेणिस्त्वधिरोहिणी २ संमार्जनी शोधनी स्या

त् २ रजो वारणी वण्डकरी वर्धनी च संकरोवकरस्तथा क्षिप्ते २

मुखं निस्सरणं २ सन्निवेशो निकर्षणः २ समौ संवसथग्रामौ २

ड्रंगं ग्रामप्रधाने विटंकं च वेश्मभूर्वास्तुरस्त्रियां २ ग्रामान्त उपश

ल्यं स्यात् २ सीमसीमे स्त्रियावुभे २ घोष आभीरपल्लिः स्यात् २

पक्कणः शबरालयः इत्यमरकोशे द्वितीयकाण्डे पुरवर्गः द्वितीयः

२ ॐ महीध्रशिखरिक्ष्माभृदहार्यधरपर्वताः अद्रिगोत्रगिरिग्रा

वाचलशैलशिलोच्चयाः १३ लोकालोकश्चक्रवालः २ त्रिकूटः
त्रिककुत्समौ २ अस्तस्तु चरमः क्ष्माभृत् १ उदयः पूर्वपर्वतः २
हिमवान्निषधो विंध्यो माल्यवान्पारियात्रकः गंधमादनमन्ये च हे
मकूटादयो नगाः हिमालयोद्रिराजः स्यात् १ मलयश्चंदनाचलः
२ पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत् ७ कूटोस्त्री शि
खरं शृंगं प्रपातस्त्वतटो भृगुः ३ कटकोस्त्री नितंबोद्रेः २ स्नुः प्र
स्थः सानुरस्त्रियां ३ उत्सः प्रस्रवणं वारिप्रवाहो निर्झरो झरः ५
दरी तु कंदरो वा स्त्री २ देवखातबिले गुहा गह्वरं १ गंडशैलास्तु ३३

च्युताः स्थूलोपला गिरेः २ खनिः स्त्रियामाकरः स्यात् २ खा
निजाव पादाः प्रत्यन्तपर्वताः २ उपत्यकाद्रेरासन्ना भूमिः २ ऊ
र्ध्वमधित्यका २ धातुर्मनःशिलाद्यद्रेः २ गैरिकं तु विशेषतः
२ निकुंजकुंजौ वा क्लीबे लतादिपिहितोदरे इत्यमरकोशे द्वि
तीयकांडे शैलवर्गस्तृतीयः ३ ॐ अटव्यरण्यं विपिनं गहनं का
ननं वनं ६ महारण्यमरण्यानी गृहारामास्तु निष्कुटाः २ अमा
त्यगणिकागेहोपवने वृक्षवाटिका २ आरामः स्यादुपवनं कृ
त्रिमं वनमेव यत् पुमानाक्रीड उद्यानं राज्ञः साधारणं वने २ स्या

अं
को
३५

34

देतदेवप्रमदावनमंतःपुरोचितं १ वीथ्यालिरावलिःपंक्तिश्रेणी ५
लेखास्तुराजयः २ वन्यावनसमूहेस्यात् १ अंकुरोभिनवोद्भि-
दि १ प्ररोहश्च वृक्षोमहीरुहःशाखीविटपीपादपस्तरुः अनोक-
हःकुटःसालःपलाशीद्रुद्रुमागमाः १३ अगनगौच वानस्पत्यःफ-
लैःपुष्पात् १ तैरपुष्पाद्वनस्पतिः १ ओषधिःफलपाकांता १ स्या-
दवंध्यःफलेग्रहिः २ वंध्योफलोवकेशीच ३ फलवान्फलिनः-
फली ३ प्रफुल्लोत्फुल्लसंफुल्लव्याकोशविकचस्फुटाः फुल्लश्चै-
तेविकसितेस्युः ७ अवंध्यादयस्त्रिषु स्थाणुःरस्त्रीध्रुवःशंकुः २ ३५

णुह्रस्वशाखाशिफःक्षुपः अप्रकांडेस्तम्बगुल्मौ २ वल्लीतुव्रत
तिर्लता ३ लताप्रतानिनीवीरुद्गुल्मिन्युलपइत्यपि ५ नगा
द्यारोहउच्छ्रायउत्सेधश्चोच्छ्रयश्चसः ३ अस्त्रीप्रकांडःस्कंधःस्या
न्मूलाच्छाखावधिस्तरोः १ समेशाखालते २ शिखाच स्कंधशा
खाशाले २ शिफाजटे २ शाखाशिफावरोहःस्यान्मूलादूर्ध्वंगता
लता १ शिरोग्रंशिखरंवाना ३ मूलंबुध्नोंघ्रिनामकः सारोम
ज्जानरि १ त्वक्स्त्रीवल्कंवल्कलमस्त्रियां ३ काष्ठंदारु २ इन्ध
नंत्वेधइध्ममेधःसमित्स्त्रियां ५ निष्कुहःकोटरंवाना २ वल्लरिर्मं

अ॰
को॰
३५

लताःस्त्रियां २ पत्रंपलाशंछदनंदलंपर्णंछदःपुमान् १ पल्ल-
वोऽस्त्रीकिसलयं ५ विस्तारोविटपोऽस्त्रियां २ वृक्षादीनांफलंस-
स्यं २ वृन्तंप्रसवबंधने २ आमेफलेशलाटुःस्यात् २ शुष्केवानं
२ उभेत्रिषु क्षारकोजालकंक्लीबे २ कलिकाकोरकःपुमान् २ स्या-
द्गुच्छकस्तुस्तबकः २ कुड्मलोमुकुलोऽस्त्रियां २ स्त्रियःसुमन-
सःपुष्पंप्रसूनंकुसुमंसुमं ४ मकरंदःपुष्परसः २ परागःसु-
मनोरजः २ द्विहीनंप्रसवेसर्वंहरीतक्यादयःस्त्रियां २ आश्व-
त्थवैणवप्लाक्षनैयग्रोधैंगुदंफले ५ बार्हतंच २ फलेजम्ब्वाजम्बूः ३५

हीजंभुजांभवं ३ पुष्पेजातीप्रभृतयःस्वलिंगाःव्रीहयःफले
विदार्याद्यास्तुमूलेपिपुष्पेक्लीवेपिपाटला वनवर्गः बोधिद्रु
मश्चलदलःपिप्पलःकुंजराशनः अश्वत्थः ५ केशवावासोमं
गल्यःश्यामलश्च अथकपित्थेस्युः दधित्थग्राहिमन्मथाः तं
स्मिन्दधिफलःपुष्पफलदंतशठावपि ७ उदुंबरेजंतुफलोय
ज्ञांगोहेमदुग्धकः ५ कोविदारेचमरिकःकुद्दालोयुगपत्रकः
सप्तपर्णोविशालत्वक्शारदोविषमच्छदः ५ आरग्वधोराज
वृक्षशंपाकचतुरंगुलाः आरेवतव्याधिघातकृतमालसुव

अ॰
को॰
३६
36

ज्जकः पु. जंभीरे दंतशठजंभजंभीरजंभलाः पु. वरुणो वरणः
णः सेतुस्तिक्तशाकः कुमारकः पु. पुंनागे पुरुषस्तुंगः केसरो दे
ववल्लभः पु. पारिभद्रे निंबतरुर्मंदारः पारिजातकः पु. तिनिशे
स्यंदनो नेमी रथद्रुरतिमुक्तकः पु. वंजुलश्चित्रकृच्चाथ २ द्वौ पी
तनकपीतनौ आम्रातके ३ मधूके तु गुडपुष्पमधुद्रुमौ वानप्र
स्थमधुष्ठीलौ पु. जलजेऽत्र मधूलकः १ पीलुः गुडफलः स्रंसी
तस्मिंस्तु गिरिसंभवे ३ अक्षोटकंदरालौ द्वौ पर्वतीयश्च फलस्ने
हो गुडाशयः कैवेलः स्वादुमज्जा [illegible] अंकोटे तु निकोच ३६

कः २ पलाशे किंशुकः पर्णो वातपोथः ४ अथ वेतसे रथाभ्रपु॰
ष्पविनलशीतवानीरवंजुलाः ६ द्वौ परिव्याधनिदुलौ नादेयी चांबु॰
वेतसे ३ दीर्घपत्रस्तु सोभाजने शिग्रुतीक्ष्णगंधकाक्षीवमोच॰
कः ५ रक्तोसौ मधुशिग्रुः स्यात् १ अरिष्टः फेनिलः समौ २ बि॰
ल्वे शांडिल्यशैलूषौ मालूरश्रीफलावपि ४ प्लक्षो जटी पर्कटी स्या॰
त् ३ न्यग्रोधो बहुपाद्वटः ३ गालवः शावरो लोध्रस्तिरीटः तिल्व॰
मार्जनौ ६ आम्रश्चूतो रसालः १ असौ सहकारोतिसौरभः ५ का
मांको मदिगामतवः परपुष्टमहोत्सवः कुंभोलूखलकं क्लीबे कौ॰

श्रे॰ को॰ ३२

गुग्गुलुः पुरः ४ शेलुः श्लेष्मातकः शीतउद्दालो बहुवारकः ५
राजादनं प्रियालः स्यात्सन्नकद्रुर्धनुःपटः ४ गंभारी सर्वतोभद्रा
काश्मरी मधुपर्णिका श्रीपर्णी मधुपर्णी च काश्मर्यश्चापि ७ अ
थद्वयोः कर्कन्धूः बदरी कोलिः ३ कोलंकुवलफेनिले सौवीरंब
दरं कोले ५ अथस्यात्स्वादुकण्टकः विकंकतः स्रुवावृक्षो ग्रन्थिलो
व्याघ्रपादपि ५ ऐरावतो नागरंगः २ नादेयी भूमिजंबुका २ ति
न्दुकः स्फूर्जकः कालस्कन्धश्च शितिसारके काकेन्दुः कुलकः काक
तिन्दुकः काकपीलुके ४ गोलीढो झाटलो घंटापाटलिर्मोक्षमुष्कक ३२

कौ १ तिलकःक्षुरकःश्रीमान् ३ समौपिचुलझाबुकौ २ श्री
पर्णिकाकुमुदिकाकुंभीकैटर्यकट्फलौ ५ क्रमुकःपट्टिका॰
ख्यःस्यात्पट्टीलाक्षाप्रसादनः ४ तूदस्तुयूपःक्रमुकोब्रह्म॰
ण्योब्रह्मदारुच १ नीपप्रियककदम्बास्तुहलिप्रिये ४
वीरवृक्षोऽरुष्करोऽग्निमुखीभल्लातकीत्रिषु ४ गर्दभांडेकंदराल॰
कपीतनसुपार्श्वकाःप्लक्षश्च ५ तिंतिडीचिंचाम्लिका ३ अथो
पीतसालके सर्जकासनबंधूकपुष्पप्रियकजीवकाः १ सा॰
लेतुसर्जकार्श्याश्वकर्णकाःसस्यसंवरः ४ नदीसर्जोवीरतरुरिं॰

अ॰
को॰
३८
38

द्रुःककुभोऽर्जुनः राजादनःफलाध्यक्षःक्षीरिकायां ३ अथद्वयोः
इङ्गुदीतापसतरुः २ भूर्जेचर्ममृदुत्वचौ पिच्छिलापूरणीमोचा
स्थिरायुःशाल्मलिर्द्वयोः ५ पिच्छातुशाल्मलीवेष्टे २ रोचनःकू
टशाल्मलिः २ चिरबिल्वोनक्तमालःकरजश्चकरञ्जकः ४ प्रकी
र्यःपूतिकरजःपूतीकःकलिमारकः ४ करञ्जभेदाःषड्ग्रन्थोम
र्कट्यङ्गारवल्लरी ३ रोहीरोहितकःप्लीहशत्रुर्दाडिमपुष्पकः ४
रक्ताङ्गोरक्तोरक्तपुष्पकश्च गायत्रीबालपत्रःस्यात्खदिरोदन्तधा
वनः ४ अरिमेदोविट्खदिरे २ कदरःखदिरेसितेसोमवल्कोऽ ३८

पि २ अथ व्याघ्रपुच्छगन्धर्वहस्तकौ एरंड उरुबूकश्च रुचकश्चि
त्रकश्च सः चंचुः पंचांगुलः मंडवर्धमानव्यडंबकाः ११ अल्पा श
मी शमीरः स्यात् १ शमी सक्तुफला शिवा ३ पिंडीतको मरुबकः
श्वसनः करहाटकः शल्यश्च मदने ६ शक्रपादपः परिभद्रकः
भद्रदारु द्रुकिलिमं पीतदारु च दारु च पूतिकाष्ठं च सप्त स्युर्देव
दारुणि ७ अथ द्वयोः पाटलिः पाटला मोघा काचस्थाली फले
रुहा कृष्णवृंता कुबेराक्षी श्वेता स्यात्काष्ठपाटला २ वसंतदूती
ताम्रीकीता अथ छेत्रवासिनी कास्याकी प्रियवल्ली चक्षणमा तम

ग्रं
को
३५
39

ह्लिलाह्वया लतागोवंधनीगुंद्राप्रियंगुः फलिनीफली ५४ वि

ष्वक्सेनागंधवह्लीकंभाप्रियकाचसा मंडूकपर्णीपत्रोर्णनटक

ट्वंगटुंटुकाः मद्दूरसंघोरल्लकः प्रियजीवश्चभल्लूकः ९ष्यकःशि

ग्वोजस्तुवृत्तः मल्लकोजंतुवृह्लकः श्योनाकशुकनासादीर्घ

वृंतकुटन्नटः श्योनाकश्चारलः १० तिष्यफलात्वामलकीत्रिषु

अमृताचवयस्थाचजातीरसफलाशिवा ९ जातीरसंश्रीफले

चतिष्यंचामलकंफले विष्वक्सेनागंधफलाकारंभःप्रियका

चसा ५ संवर्तकस्तुवासंतःकल्कोहार्योविभीतकः नाक्षस्तु ३५

षः कर्षफलोऽक्षनामासः कलिद्रुमः १० अभयात्वव्यथापथ्या
कायस्थापूतनामृता हरीतकीहैमवतीचेतकीश्रेयसीशिवा ११
पीतद्रुःसरलःपूतिकाष्ठं च दारुद्रुमोत्पलः कर्णिकारःपरि
व्याधः द्र लकुचोलिकुचोडहः द्र पनसःकंटकिफलः २ नि
चुलोहिज्जलेज्जलौ द्र काकोदुंबरिकाफल्गुर्मलयूर्जघनेफला
ष फलभारीष्विपथ्यामरूजीफल्गुवाटिका ५ काश्मीरिका
श्मालाचकपिलामाफलोत्तमा ऊँत्वगपष्ठिकाद्राक्षाप्रियालिज्ञा
पत्ताप्रिया ५ अरिष्टःसर्वतोभद्रोहिंगुनिर्यासमालकाः पिचुमंद

अ॰ को॰ ४० ५०

स्रुनिम्बः १ अथ पिच्छिलागुरुशिंशपा २ कपिलाभस्मगर्भा सा २

शिरीषस्तु कपीतनः भंडिलः ३ अथ चाम्पेयश्चंपको हेमपुष्प

कः ३ एतस्य कलिका गंधफली स्यात् २ अथ केसरे बकुलः २

वंजुलोशोकः २ समौ करकदाडिमौ २ चाम्पेयः केसरो नागकेस-

रः कांचनाह्वयः ४ जयाजयंतीतर्कारीनादेयीवैजयंतिका ५

श्रीपर्णमग्निमंथः स्यात्कणिकागणिकारिकाजयः १० अथ कुट

जः शक्रो वत्सको गिरिमल्लिका ४ एतस्यैव कलिंगेंद्रयवभद्र-

यवं फले ३ कृष्णपाकफलाविग्नसुषेणाः करमर्दके ४ काल ४०

स्कंधस्तमालः स्यात्तापिच्छोपि ३ अथ सिंदुकः सिंदुवारेंद्रसु
रसौ निर्गुंडींद्राणिकेत्यपि ५ वेणी खरा गरी देवताडो जीमूत
इत्यपि ५ श्रीहस्तिनी तु भूरुंडी २ तृणशून्यं तु मल्लिका भू
पदी शीतभीरुश्च ४ सैवास्फोता वनोद्भवा २ शेफालिका तु
सुवहा निर्गुंडी नीलिका च सा ३ सितासौ श्वेतसुरसा भूतवे
शी २ अथ मागधी गणिका यूथिकाम्बष्ठा ४ सा पीता हेमपु
ष्पिका २ अतिउष्णा उग्रगंधा उज्वला सुवर्णा यूथी हरिणी
व ५ अतिमुक्तः पुंड्रकः स्याद्वासंती माधवी लता सुमनाः मा

अ॰
को॰
५२
41

लतीजातिः ३ राजपुत्रीप्रियंवदाहृद्यगंधातैलभाविनीच सप्त
लानवमालिका २ माध्यंकुंदं २ रक्तकस्तुबंधूकोबंधुजीवकः
३ सहाकुमारीतरणिः ३ अम्लानस्तुमहासहा २ तत्रशोणेकु
रवकःतत्रपीतेकुरंटकः २ नीलाझिंटीद्वयोर्बाणादासीचार्तग
लश्चसा ५ सैरेयकस्तुझिंटीस्यात् २ तस्मिन्कुरवकोऽरुणे २
पीतेकुरंटकेझिंटी २ तस्मिन्सहचरीद्वयोः २ ओड्रपुष्पंजपाव
ज्रपुष्पंतिलस्ययत् प्रतिहासशतप्रासचंडातहयमार
काःकरवीरे ५ करीरेतुक्रकरग्रंथिलावुभौ ३ उन्मत्तःकित ५२

वोधूर्त्तोधत्तूरः कांचनाह्वयः मातुलोमदनश्चा ७ स्यफलेमा
तुलपुत्रकः १ फलपूरोवीजपूरो २ रुचकोमातुलुंगके ४
समीरणोमरुवकः प्रस्थपुष्पः फणिज्जकः जम्वीरोपि ५ अथ
पर्णासेकठिंजरकुठेरकौ ३ सितेर्जकोत्र १ पाठीतुचित्रकोव
ह्निसंज्ञकः ३ अर्काह्ववसुकास्फोटगणरूपविकीरणाः मंदार
श्चार्कपर्णोत्र शुक्लेलर्कप्रतापसौ २ शिवमल्लीपाशुपतएका
ष्ठीलोवुकोवसुः ५ वंदावृक्षादनीवृक्षरुहाजीवंतिकेत्यपि ४
वत्सादनीछिन्नरुहागुडूचीतंत्रिकामृता जीवंतिकासोमवल्ली

अ॰ को॰ ५२

५२

